# काव्यलक्षणविमर्शः

**डॉ. ललित किशोर शर्मा**
प्राचार्यः सह-आचार्यश्च
श्री दिगम्बर जैन आचार्य संस्कृत महाविद्यालय, सांगानेर, जयपुर

आचार्यभामहस्य काव्यलक्षणतः पण्डितराजजगन्नाथस्य रसगङ्गाधरपर्यन्तं समग्रसाहित्यशास्त्रस्य काव्यलक्षणेषु एवं ज्ञायते यत् साहित्यशास्त्रज्ञैः काव्यस्य लक्षणं पृथक्-पृथग्रूपेण अकारि। तेषु मतद्वयं वर्तेते -

1. शब्दप्रामुख्यपरम्।
2. शब्दार्थोभयप्रामुख्यपरम्।

सर्वप्रथमम् अस्माभिः इह शब्दमाधारीकृत्य काव्यलक्षणानि प्रस्तुतीक्रियन्ते।

1. काव्यादर्शे आचार्यदण्डिना भणितं काव्यलक्षणम् -

**शरीरं तावदिष्टार्थव्यवछिन्ना पदावली**[1]

काव्यस्य मौलिकः आधारः शब्दः एव। शब्दस्य माहात्म्यविषये कथयति आचार्यदण्डी-

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते ॥**[2] **इति।**

2. आचार्यजयदेवः लिखति चन्द्रालोकग्रन्थे -

**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**

**सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक् ॥**[3] **इति।**

निर्दोषाद्युक्तधर्मविशिष्टं काव्यमिति काव्यलक्षणम्।

3. रसगङ्गाधरकारः पण्डितराजजगन्नाथः ब्रुते -

**रमणीयार्थप्रतिपादकः शब्दः काव्यम्**[4]

का च रमणीयता इत्युच्यते तर्हि -

आह्लादापरपर्यायलोकोत्तरचमत्कारशालित्वमेवार्थनिष्ठं रमणीयत्वम्।

आह्लादस्य अपरं नाम रमणीयता वर्तते।

सम्प्रति शब्दार्थावाधारीकृत्य काव्यलक्षणानि कानि कानि इति विवेचयामः।

1. आचार्यभामहेन प्रोक्तम् -

**शब्दार्थौ सहितौ काव्यम्।** [5]

2. आचार्यरुद्रटस्य काव्यलक्षणमिदम् -

**शब्दार्थौ काव्यम्।** [6]

3. काव्यालङ्कारसूत्रवृत्तौ वामनाचार्येण कथितम् -

**काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते।**

**काव्यं ग्राह्यमलङ्कारात्** [7]

अलङ्कारादेव काव्यं ग्रह्यं भवतीत्यभिप्रायः।

**सौन्दर्यमलङ्कारः** – अलङ्कारः एव सौन्दर्य वर्तते।

काव्ये सौन्दर्यमिदं कथमायाति इत्युच्यते -

**स दोषगुणालङ्कारहानादानाभ्याम्**

गुणालङ्कारैः सह दोषरहितः शब्दार्थः काव्यम्।

4. वक्रोक्तिजीवितकारः कुन्तकः कथयति काव्यलक्षणम् -

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**

**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥** [8]

शब्दार्थौ सहितौ काव्यमिति।

5. आचार्यमम्मटभणितलक्षणम् -

**तददोषौ शब्दाऽर्थौ सगुणावनलङ्कृती पुनः क्वाऽपि।**[9]

6. आचार्यवाग्भटेन प्रणीतम् -

**साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् ।**

**स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥**[10]

7. एकावल्यां विद्याधरेण प्रोक्तम् -

**शब्दार्थवपुस्तावत् काव्यम्**[11]

8. विद्यानाथेन स्वकीये प्रतापरुद्रीयमित्याख्ये ग्रन्थे कथितम् -

**गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।**

**गद्यपद्योभयमयं काव्यं काव्यविदो विदुः॥**[12]

9. अच्युतरायः साहित्यसारे काव्यलक्षणं उपस्थापयति -

**तत्र निर्दोषशब्दार्थगुणवत्त्वे सति स्फुटम्।**

**गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम्॥**[13]

10. धर्मसूरिणा साहित्यरत्नाकारे भणितम् -

**सगुणाऽलङ्कृती काव्यं पदार्थौ दोषवर्जितौ।**[14]

11. कविकण्ठाभरणे आचार्यक्षेमेन्द्रः कथयति -

**काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृति।**[15]

12. आचार्यभोजदेवविरचितसरस्वतीकण्ठाभरणे -

**निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।**

**रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥** [16]

13. अलङ्कारचन्द्रिकायां न्यायवागीशः कथयति -

**गुणाऽलङ्कारसंयुक्तौ शब्दाऽर्थौ रसभावगौ।**

**नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते ॥** [17]

14. काव्याऽनुशासनकारः प्रस्तौति लक्षणमिदम् -

**शब्दार्थौ निर्दोषौ सगुणौ प्रायः साऽलङ्कारौ काव्यमिति।** [18]

15. आचार्यराजशेखरेण उक्तम् -

**गुणवदलङ्कृतं वाक्यमेव काव्यम्।** [19]

16. आनन्दवर्धनाचार्येण प्रोक्तम् -

**सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्।** [20]

17. काव्याऽनुशासनकारहेमचन्द्रस्य मते -

**'अदोषौ सगुणौ साऽलङ्कारौ च शब्दार्थौ काव्यम्'** [21]

18. प्रकृतालङ्कारिकविश्वनाथकविराजमते लक्षणमिदम् -

**'वाक्यं रसात्मकं काव्यम्'** [22]

उपर्युक्तविवेचनेन ज्ञायते यत् साहित्यशास्त्रस्य विभिन्नकालक्रमे विद्वद्भिः विविधप्रकारैः काव्यलक्षणमुक्तम्। कालक्रमतः काव्यलक्षणप्रसङ्गेऽपि नूतनत्वं समायातम्। मुख्यतः उद्देश्यं काव्यरचनायाः धर्मार्थकाममोक्षादिप्राप्तिरेव सर्वेषाम् अयमेवाभिप्रायः। काव्यस्यात्मा रस इति निश्चिते सति शब्दार्थावेव काव्यस्य शरीरमिति प्राक्तनैः आधुनिकैश्च विद्वद्भिः प्रोक्तमिति।

**सन्दर्भाः**

1 काव्यादर्शः

2 काव्यादर्शः - आचार्यदण्डी 1/4 (पृ.सं.-6)

3 चन्द्रालोकः - (पीयूषवर्षजयदेवविरचितः) 1/7 (पृ.सं.-5)

4 रसगङ्गाधरः - 1/1 (पृ.सं.-7)

5 काव्यालङ्कारः - (आचार्यभामहविरचितः) - 1/16

6 काव्यालङ्कारः - (आचार्यरुद्रटविरचितः) - 2/1 (पृ.-8)

7 काव्यालङ्कारसूत्रवृत्तिः - (आचार्यवामनविरचितम्) - (1/1/1-3)

8 वक्रोक्तिजीवितम् - 1/7

9 काव्यप्रकाशः प्रथमो ऽध्याये।

10 वाग्भटालङ्कारः (वाग्भट्टप्रणीतम्) - 1/2 (पृ.3)

11 एकावली - (आचार्यविद्याधरप्रणीतम्)।

12 प्रतापरुद्रीयम् (श्रीविद्यानाथप्रणीतम्) - नायकप्रकरणम् - श्लोकसं.-1 (पृ.30)

13 साहित्यसारः - (अच्युतरायप्रणीतम्)।

14 साहित्यरत्नाकरः - (आचार्यधर्मसूरिविरचितम्)।

15 कविकण्ठाभरणम् - (आचार्यक्षेमेन्द्रः)

16 सरस्वतीकण्ठाभरणम् (आचार्यभोजदेवः) - 1/2 (पृ.2)

17 अलङ्कारचन्द्रिका - (न्यायवागीशप्रणीतम्)।

18 काव्यानुशासनम् - वाग्भट्टद्वितीयः।

19 काव्यमीमांसा - राजशेखरः - षष्ठोऽध्यायः - पदवाक्यविवेकः (पृ.24)

20 ध्वन्यालोकः - आनन्दवर्धनाचार्यः।

21 काव्यानुशासनम् (आचार्यहेमचन्द्रविरचितम्) - 1/11 (पृ.सं.-11)

22 साहित्यदर्पणम् - (पृ.सं.-24)